स्वकीयजन्मलग्नमकरसंज्ञकानि ॥*॥ अथ धान्यस्थापनदिनम्। तत्र नक्षत्राणि। भरण्यश्लेषार्द्राकृत्तिकाविशाखापूर्ब्बफल्गुनीपूर्ब्बाषाढ़ापूर्ब्बभाद्रपज्ज्येष्ठामघाभिन्नानि। तत्र वाराः शुभग्रहाणाम्। लग्नानि मकरवृषसिंहवृश्चिककुम्भमिथुनकन्याधनुर्मीनसंज्ञकानि ॥*॥ अथ धान्यादिवृद्धिदानदिनम्। तत्र नक्षत्राणि श्रवणा धनिष्ठा शतभिषा विशाखा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी रेवती पुनर्व्वसुः पुष्यः अश्विनी ज्येष्ठा एतानि। वाराः बुधभिन्नाः। इति ज्योतिषम् ॥

धान्यकं, क्ली, (धान्यमिव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) धान्याकम्। इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये। "लङ्घनानन्तरं चान्नकाले धान्यकजीरकादिदीपनसिद्धान्यन्नानि ॥" अस्य गुणा यथा,—
"धान्यकञ्चाजगन्धा च सुमुखा चेति रोचनाः।
सुगन्धा नातिकटुका दोषानुत्क्लेशयन्ति तु ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥
धान्यमेव स्वार्थे कन्। धान्यम्। पुं, चत्रियनृपतिविशेषः। यथा, राजतरङ्गिण्याम्।८।९०५।
"राजन्याविच्छिटक्कलोद्भूतावुदयधान्यकौ ॥")

धान्यकोष्ठकं, क्ली, (धान्याय धान्यरक्षणाय यत् कोष्ठकं गृहम्।) धान्यरक्षार्थगृहम्। इति हलायुधः ॥ गोला इति भाषा ॥

धान्यचमसः, पुं, (चम्यते भक्ष्यते इति। चम+असन्। धान्यं छिन्नधान्यमेव चमसः।) चिपिटकः। इति त्रिकाण्डशेषः ॥

धान्यधेनुः, स्त्री, (धान्यनिर्म्मिता धेनुः।) दानार्थधान्यनिर्म्मितधेनुः। यथा,—
"विषुवे चायने वापि कार्त्तिक्यान्तु विशेषतः।
तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम् ॥
यां दत्त्वा सर्व्वपापेभ्यः शशाङ्क इव राहुतः ॥
दशधेनुप्रदानेन यत् फलं राजसत्तम !।
तत् सर्व्वमेवमाप्नोति ब्रीहिधेनुप्रदो नरः ॥
कृष्णाजिनं ततः कृत्वा प्रागवदत् संन्यसेद्बुधः।
गोमयेनानुलिप्तायां शोभनां वस्त्रसंयुताम् ॥
पूजयेद्वेदिमध्ये तु वेदनिर्घोषमङ्गलैः ॥
उत्तमा धान्यधेनुः स्याद्द्रोणाश्चापि चतुष्टयैः।
मध्यमा च तदर्द्धेन वित्तशाठ्यं न कारयेत् ॥
चतुर्थांशेन धेन्वा वै वत्सञ्च परिकल्पयेत्।
कर्णौ रुक्मशृङ्गे तु राजतखुरसंयुता ॥
गोरथः पूर्व्ववद्घ्राणमगुरुचन्दनन्तथा।
मुक्ताफलमया दन्ता घृतक्षौद्रमयं मुखम् ॥
प्रशस्तपत्रश्रवणा कांस्यदोहनकान्विता।
इक्षुयष्टिमयाः पादाः क्षौमपुच्छसमन्विता ॥
नानाफलसमोपेता रत्नगर्भसमन्विता।
पादुकोपानहौ छत्रे भाजनं तर्पणं तथा ॥
इत्येवं रचयित्वा तां कृत्वा दीपार्च्चनादिकम्।
पुण्यकालञ्च संप्राप्य स्नातः शुक्लाम्बरो गृही।
त्रिः प्रदक्षिणमावृत्य मन्त्रेणानेन कीर्त्तयेत् ॥
तव विप्र ! महाभाग ! वेदवेदाङ्गपारग !।
यामेताञ्च मया दत्तां गृह्णीष्व त्वं द्विजोत्तम !।
प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥
त्वमेका लक्ष्मीर्गोविन्दे स्वाहा या च विभावसौ।
शक्रे शचीति विख्याता मेधा मुनिषु सत्तम ! ॥
तस्मात् सर्व्वमयी देवी धान्यरूपेण संस्थिता।
एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
दत्त्वा प्रदक्षिणं कृत्वा तं समाप्य द्विजोत्तमम्।
यावच्च पृथिवी सर्व्वा वसुरत्नानि भूपते !।
तावत् पुण्यं समाधिक्यं ब्रीहिधेनोश्च तत् फलम् ॥
तस्मान्नरेन्द्र ! दातव्या भुक्तिमुक्तिफलप्रदा।
इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥
विमानेनार्कवर्णेन किङ्किणीरत्नमालिना।
स्तूयमानोऽप्सरोभिश्च प्रयाति शिवमन्दिरम् ॥
यावच्च स्मरते जन्म तावत् स्वर्गे महीयते।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
एवं हरेण चोक्तोऽसौ श्रुत्वा वाक्यं नरोत्तम।
सर्व्वपापविशुद्धात्मा रुद्रलोके महीयते ॥"
इति वराहपुराणम् ॥

धान्यबीजं, क्ली, (धान्यस्य बीजमिव बीजं यस्य।) धन्याकम्। इति राजनिर्घण्टः ॥

धान्यमायः, पुं, (धान्यं मातीति। मा+"काचामश्च।" ३। २। ३। इति अण्।) धान्यविक्रयी। इति संक्षिप्तसारव्याकरणम् ॥

धान्यराजः, पुं, (धान्यानां राजा। टच् समासे। यद्वा, धान्येषु राजते इति। राज दीप्तौ+अच्।) यवः। इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यवशब्दे ज्ञातव्याः ॥)

धान्यवर्द्धनं, क्ली, (धान्यस्य वर्द्धनं वृद्धिर्यस्मात्।) वार्द्धुष्यम्। इति त्रिकाण्डशेषः ॥ धानेर वाड़ी इति भाषा ॥

धान्यवीरः, पुं, (धान्येषु वीर इव बलाधायकत्वात्।) माषः। इति राजनिर्घण्टः ॥

धान्यशीर्षकं, क्ली, (धान्यस्य शीर्षकं अग्रभागः।) धान्यमञ्जरी। इति जटाधरः ॥ धानेर शीष इति भाषा ॥

धान्याकं, क्ली, (धान्यमकति बाहुल्येन प्राप्नोतीति। अक गतौ+अण्।) धन्याकम्। इति हेमचन्द्रः। ३। ८३ ॥

धान्याचलः, पुं, (धान्यनिर्म्मितोऽचलः पर्व्वतः।) दानार्थधान्यनिर्म्मितपर्व्वतः। तस्य विधानं यथा,—
"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो येऽपि देयाः शास्त्रं विजानता।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम्।
प्रागुदक्प्रवणं तद्वत् प्राङ्मुखञ्च विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्महाव्रीहिमयस्तु मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात्।
पूर्व्वेण मुक्ताफलवज्रयुक्तो
याम्ये च गोमेदकपुष्परागैः ॥
पश्चाच्च गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवालसतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्।
मूर्द्धन्यवस्थानमतत्सरेण
कार्य्यास्त्वनेके च पुनर्द्विजौघाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतः स्यात्।
तथेक्षुवंशावृतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण नीलानि च दक्षिणेन।
वासांसि पश्चादथ कर्व्वुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्यान्महेन्द्रप्रमुखानथाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्या-
न्मनोरमं माल्यविलेपनञ्च ॥
वितानकञ्चोपरि पञ्चवर्ण-
मम्लानपुष्पाभरणं सितञ्च।
इत्थं निवेश्यामरशैलमग्र्यं
मेरोस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्द्दिशञ्च
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचिह्नैः।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरारुणोदसरसाथ वनेन चैव
रौप्येण शक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनञ्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजो वा ॥
हैमेन यक्षपतिनाघृतमाससेन
वस्त्रैश्च राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम्।
आकारयेद्रजतपुष्पवनेन तद्व-
द्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे।